श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ अभिषेकपद्धतिः सप्तमी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ अभिषेकपद्धतिः सप्तमी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

पाहि नः पादुके ! यस्याः
विधास्यन् अभिषेचनम्।
आभिषेचनिकं भाण्डं
चक्रे रामः प्रदक्षिणम्॥ ७.१ ॥

राघवस्य चरणौ पदावनि !
प्रेक्षितुं त्वदभिषेकमीषतुः।
आभिषेचनिकभाण्डसन्निधौ
यत् प्रदक्षिणगतिः शनैर्ययौ॥ ७.२ ॥

मूर्धाभिषिक्तैर्नियमेन वाह्यौ
विचिन्त्य नूनं रघुनाथपादौ।
रत्नासनस्थां मणिपादुके ! त्वां
रामानुजन्मा भरतोऽभ्यषिञ्चत्॥ ७.३ ॥

भ्रातुर्नियोगेऽप्यनिवर्तमानं
राज्याभिषेकं च परित्यजन्तम्।
रामानुजौ तौ ननु पारतन्त्र्यात्
उभावुभाभ्यां भवती जिगाय॥ ७.४ ॥

निवेश्य रङ्गेश्वरपादरक्षे !
भद्रासने सादरमभ्यषिञ्चत्।
वशी वसिष्ठो मनुवंशजानां
महीक्षितां वंशपुरोहितस्त्वाम्॥ ७.५ ॥

कृताभिषेका भवती यथावत्
रङ्गेशपादावनि ! रत्नपीठे।
गङ्गानिपातस्नपितां सुमेरोः
अधित्यकाभूमिमधश्चकार॥ ७.६ ॥

वसिष्ठमुख्यैर्विहिताभिषेकां
राज्यासने रामनिवेशयोग्ये।
तुष्टाव रङ्गेश्वरपादरक्षे !
प्राचेतसस्त्वां प्रथमः कवीनाम्॥ ७.७ ॥

रक्षोवधार्थं मणिपादरक्षे !
रामात्मनो रङ्गपतेः प्रवासे।
रक्षोपकारात् भवती वितेने
राजन्वतीं कोसलराजधानीम्॥ ७.८ ॥

प्राप्ताभिषेका मणिपादरक्षे !
प्रतापमुग्रं प्रतिपद्यमाना।
शशास पृथ्वीं भवती यथावत्
साकेतसिंहासनसार्वभौमी॥ ७.९ ॥

दशाननादीन् मणिपादरक्षे !
जिगीषतो दाशरथेर्वियोगात्।
जातोपतापा त्वयि संप्रयुक्तैः
तीर्थोदकैरुच्छ्वसिता धरित्री॥ ७.१० ॥

अध्यासितं मनुमुखैः क्रमशो नरेन्द्रैः
आरोप्य देवि ! भवतीं तपनीयपीठम्।
राज्याभिषेकमनघं मणिपादरक्षे !
रामोचितं तव वशं भरतो वितेने॥ ७.११ ॥

स्नेहेन देवि ! भवतीं विषयेऽभिषिञ्चन्
द्विस्सप्तसंख्यभुवनोदरदीपरेखाम्।

जातं रघूद्वहदिवाकरविप्रयोगात्
    अन्धं तमिस्रमहरत् भरतः प्रजानाम्॥ ७.१२ ॥

हस्तापचेयपुरुषार्थफलप्रसूतेः
    मूलं पदावनि ! मुकुन्दमहीरुहस्त्वम्।
छायाविशेषमदिशत् यदसौ प्रजानाम्
    आवर्जितैस्त्वयि शुभैरभिषेकतोयैः॥ ७.१३ ॥

अह्नाय रामविरहात् परिखिन्नवृत्तेः
    आश्वासनाय भवती मणिपादरक्षे !।
तीर्थाभिषेकमपदिश्य वसुन्धरायाः
    चक्रे तदा समुचितं शिशिरोपचारम्॥ ७.१४ ॥

मालिन्यमाश्रितवती मणिपादरक्षे !
    पङ्केन केकयसुताकलहोत्थितेन।
शुद्धिं परामधिजगाम वसुन्धरेयं
    त्वत्तः क्षणान्निपतितैरभिषेकतोयैः॥ ७.१५ ॥

आवर्जितं मुनिगणेन जगद्विभूत्यै
    तोयं पदावनि ! तदा त्वयि मन्त्रपूतम्।
मूलावसेकसलिलं निगमद्रुमाणां
    शापोदकं च समभूत् क्षणदाचराणाम्॥ ७.१६ ॥

विप्रोषिते रघुपतौ भवती यथार्हं
    मान्ये पदे स्थितिमती मनुवंशजानाम्।
आत्मन्यथर्वनिपुणैः प्रहितैः प्रजानाम्
    अश्रूण्यपास्यदभिषेकजलप्रवाहैः॥ ७.१७ ॥

प्रायो विशोषितरसा पतिविप्रयोगात्
    पर्याकुलीकृतसमुद्रपयोधरा गौः।
अम्ब ! त्वदीयमभिषेकपयः पिबन्ती
    धेनुर्बभूव जगतां धनधान्यदोग्ध्री॥ ७.१८ ॥

वृत्ते यथावदभिषेकविधौ बभासे
    पश्चात् तवाम्ब ! भरतेन धृतः किरीटः।
आकस्मिकस्वकुलविप्लवशान्तिहर्षात्
    प्राप्तस्त्विषामिव पतिर्मणिपादुके ! त्वाम्॥ ७.१९ ॥

मनुवंशपुरोहितेन मन्त्रैः
    अभिमन्त्र्य त्वयि पादुके ! प्रयुक्तम्।
अभिषेकजलं क्षणेन राज्ञां
    शमयामास समुत्थितान् प्रतापान्॥ ७.२० ॥

पादपादुपहृता रघूद्वहाद्
    आलवालमिव पीठमाश्रिता।
अभ्यषेचि भवती तपोधनैः
    पारिजातलतिकेव पादुके !॥ ७.२१ ॥

अलघुभिरभिषेकव्यापृतैरम्बुभिस्ते
    दिनकरकुलदैन्यं पादुके ! क्षाळयिष्यन्।
स खलु कमलयोनेः सूनुराधत्त मन्त्रेषु
    अधिकनियमयोगां शक्तिमाथर्वणेषु॥ ७.२२ ॥

दिनकरकुलजानां देवि ! पृथ्वीपतीनां
    निरुपधिमधिकारं प्राप्नुवत्यां भवत्याम्।
अजनिषत समस्ताः पादुके ! तावकीन-
    स्नपनसलिलयोगान्निम्नगास्तुङ्गभद्राः॥ ७.२३ ॥

तव विधिवदुपात्ते सार्वभौमाभिषेके
    भरतसमयविद्भिः पादुके ! मन्त्रिमुख्यैः।
त्वदवधिनिजकर्मस्थायिनीनां प्रजानां
    प्रथमयुगविशेषाः प्रादुरासन् विचित्राः॥ ७.२४ ॥

अवसितरिपुशब्दानन्वभूस्त्वं तदानीं
    रघुपतिपदरक्षे ! लब्धराज्याभिषेका।

चलितभुजलतानां चामरग्राहिणीनां
मणिवलयनिनादैर्मेदुरान् मन्त्रघोषान्॥ ७.२५ ॥

समुचितमभिषेकं पादुके ! प्राप्नुवत्यां
त्वयि विनिपतितानां देवि ! तीर्थोदकानाम्।
ध्वनिरनुगतमन्त्रः सीदतां कोसलानां
शमयितुमलमासीत् सङ्कुलान् आर्तनादान्॥ ७.२६ ॥

दिविषदनुविधेयं देवि ! राज्याभिषेकं
भरत इव यदि त्वं पादुके ! नान्वमंस्थाः।
कथमिव रघुवीरः कल्पयेदल्पयत्नः
त्रिचतुरशरपातैस्तादृशं देवकार्यम्॥ ७.२७ ॥

कतिचन पदपद्मस्पर्शसौख्यं त्यजन्ती
व्रतमतुलमधास्त्वं वत्सरान् सावधाना।
रघुपतिपदरक्षे ! राक्षसैस्त्रासितानां
रणरणकविमुक्तं येन राज्यं सुराणाम्॥ ७.२८ ॥

अथर्वोपज्ञं ते विधिवदभिषेकं विदधतां
वसिष्ठादीनामप्युपचितचमत्कारभरया।
त्वदास्थान्या रङ्गक्षितिरमणपादावनि ! तदा
लघीयस्यो जाता रघुपरिषदाहोपुरुषिकाः॥ ७.२९ ॥

अभिषेचयतु स रामः
पदेन वा स्पृशतु पादुके ! भवतीम्।
अविशेषितमहिमा त्वं
क्व वा विशेषः क्षमासमेतानाम्॥ ७.३० ॥

॥ इति श्रीपादुकासहस्रे अभिषेकपद्धतिः सप्तमी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥